श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ दशाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशाधिकशततमः सर्गः ॥

## भ्रातृभिः सहितस्य सदेहस्य श्रीरामस्य स्वीये वैष्णवे तेजसि प्रवेशस्तेन सहागतानां लोकानां सन्तानकाख्यस्य लोकस्य प्राप्तिः

अध्यर्धयोजनं गत्वा नदीं पश्चान्मुखाश्रिताम्।
सरयूं पुण्यसलिलां ददर्श रघुनन्दनः॥ 7.110.1 ॥

तां नदीमाकुलावर्तां सर्वत्रानुसरन् नृपः।
आगतः सप्रजो रामस्तं देशं रघुनन्दनः॥ 7.110.2 ॥

अथ तस्मिन् मुहूर्ते तु ब्रह्मा लोकपितामहः।
सर्वैः परिवृतो देवैर्ऋषिभिश्च महात्मभिः॥ 7.110.3 ॥

आययौ यत्र काकुत्स्थः स्वर्गाय समुपस्थितः।
विमानशतकोटीभिर्दिव्याभिरभिसंवृतः॥ 7.110.4 ॥

दिव्यतेजोवृतं व्योम ज्योतिर्भूतमनुत्तमम्।
स्वयम्प्रभैः स्वतेजोभिः स्वर्गिभिः पुण्यकर्मभिः॥ 7.110.5 ॥

पुण्या वाता ववुश्चैव गन्धवन्तः सुखप्रदाः।
पपात पुष्पवृष्टिश्च देवैर्मुक्ता महौघवत्॥ 7.110.6 ॥

तस्मिंस्तूर्यशतैः कीर्णे गन्धर्वाप्सरसङ्कुले।
सरयूसलिलं रामः पद्भ्यां समुपचक्रमे॥ 7.110.7 ॥

ततः पितामहो वाणीं त्वन्तरिक्षादभाषत।
आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव॥ **7.110.8** ॥

भ्रातृभिः सह देवाभैः प्रविशस्व स्विकां तनुम्।
यामिच्छसि महाबाहो तां तनुं प्रविश स्विकाम्॥ **7.110.9** ॥

वैष्णवीं तां महातेजो यद्वाऽऽकाशं सनातनम्।
त्वं हि लोकगतिर्देव न त्वां केचित् प्रजानते॥ **7.110.10** ॥

ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्।
त्वामचिन्त्यं महद् भूतमक्षयं चाजरं तथा।
यामिच्छसि महातेजस्तां तनुं प्रविश स्वयम्॥ **7.110.11** ॥

पितामहवचः श्रुत्वा विनिश्चित्य महामतिः।
विवेश वैष्णवं तेजः सशरीरः सहानुजः॥ **7.110.12** ॥

ततो विष्णुमयं देवं पूजयन्ति स्म देवताः।
साध्या मरुद्गणाश्चैव सेन्द्राः साग्निपुरोगमाः॥ **7.110.13** ॥

ये च दिव्या ऋषिगणा गन्धर्वाप्सरसश्च याः।
सुपर्णनागयक्षाश्च दैत्यदानवराक्षसाः॥ **7.110.14** ॥

सर्वं पुष्टं प्रमुदितं सुसम्पूर्णमनोरथम्।
साधुसाध्विति तैर्देवैस्त्रिदिवं गतकल्मषम्॥ **7.110.15** ॥

अथ विष्णुर्महातेजाः पितामहमुवाच ह।
एषां लोकं जनौघानां दातुमर्हसि सुव्रत॥ **7.110.16** ॥

इमे हि सर्वे स्नेहान्मामनुयाता यशस्विनः।
भक्ता हि भजितव्याश्च त्यक्तात्मानश्च मत्कृते॥ **7.110.17** ॥

तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः।
लोकान् सन्तानकान् नाम यास्यन्तीमे समागताः॥ **7.110.18** ॥

यच्च तिर्यग्गतं किञ्चित् त्वामेवमनुचिन्तयत्।
प्राणांस्त्यक्ष्यति भक्त्या तत् सन्तानेषु निवत्स्यति॥ **7.110.19** ॥

सर्वैर्ब्रह्मगुणैर्युक्ते ब्रह्मलोकादनन्तरे।
वानराश्च स्विकां योनिमृक्षाश्चैव तथा ययुः॥ **7.110.20** ॥

येभ्यो विनिःसृताः सर्वे सुरेभ्यः सुरसम्भवाः।
तेषु प्रविविशे चैव सुग्रीवः सूर्यमण्डलम्॥ **7.110.21** ॥

पश्यतां सर्वदेवानां स्वान् पितॄन् प्रतिपेदिरे।
तथा ब्रुवति देवेशे गोप्रतारमुपागताः॥ **7.110.22** ॥

भेजिरे सरयूं सर्वे हर्षपूर्णाश्रुविक्लवाः।
अवगाह्याप्सु यो यो वै प्राणांस्त्यक्त्वा प्रहृष्टवत्॥ **7.110.23** ॥

मानुषं देहमुत्सृज्य विमानं सोऽध्यरोहत।
तिर्यग्योनिगतानां च शतानि सरयूजलम्॥ **7.110.24** ॥

सम्प्राप्य त्रिदिवं जग्मुः प्रभासुरवपूंषि तु।
दिव्या दिव्येन वपुषा देवा दीप्ता इवाभवन्॥ **7.110.25** ॥

गत्वा तु सरयूतोयं स्थावराणि चराणि च।
प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन्॥ **7.110.26** ॥

तस्मिन् येऽपि समापन्ना ऋक्षवानरराक्षसाः।
तेऽपि स्वर्गं प्रविविशुर्देहान् निक्षिप्य चाम्भसि॥ **7.110.27** ॥

ततः समागतान् सर्वान् स्थाप्य लोकगुरुर्दिवि।
हृष्टैः प्रमुदितैर्देवैर्जगाम त्रिदिवं महत्॥ **7.110.28**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे दशाधिकशततमः सर्गः॥